# रामायणम्

**Presented by**
Achyuta Adhikari
SACT-II
Department of Sanskrit
Saltora Netaji Centenary College
Saltora, Bankura, 722158.
E-mail: achyutaadhikary00538@gmail.com

# रामायणम्

रामस्य अयनं (चरितं) रामायणम् । रामायणमादिकाव्यं सर्वेषां संस्कृतभाषाकाव्यानां जीवातुभूतं च भवति । रामायणं महाभारतवत् कश्चिदितिहासग्रन्थो भवति । संस्कृतसाहित्येषु रामायणवत् प्रसिध्दः लोकप्रियश्च अन्यो ग्रन्थो नास्तीति वक्तुं शक्यते । नीतिदृष्ट्या काव्यात्मकदृष्ट्या लोकोपकारकदृष्ट्या च रामायणस्य महत्त्वं वर्धते । पितृपुत्रधर्मस्य पतिपत्नीधर्मस्य भ्रातृधर्मस्य तथा अन्यकौटुम्बिकधर्मस्य च आदर्शभूतो अयं ग्रन्थः ॥ आदिकाव्यस्य रामायणस्य कर्ता श्रीमद्वाल्मीकिः ।

# रामायणस्य रचनाकालः

- अतिप्राचीनां अपि रामायणादिग्रन्थानाम् रचनाकालः एषः एव इति प्रायेण वक्तुं भाषाविज्ञानद्वारेण शक्यते । वस्तुतः एतस्मिन् वर्षे एतस्मिन् मासे एतस्मिन् दिने एतस्मिन समये एषः ग्रन्थः रचितः इति कथनं अशक्यं । तथापि एतादृशग्रन्थानां रचनाकालविषये पण्डिताः भिन्नं भिन्नं मतं प्रकटयन्ति । तदनुसृत्य रामायणस्यापि कालस्य सामान्यनिर्णयः कृतः अस्ति ।।

# रामस्य वनवासः

- राजा दशरथः स्वस्य उत्तराधिकारिणं रामं युवराजं कर्तुं निश्चितवान् । अयोध्यायाः जनाः एतस्याः घोषणायाः महता सन्तोषेण स्वागतं कृतवन्तः । दशरथः एतस्य उत्सवस्य विषये चर्चां कर्तुं पत्न्याः कैकेय्याः समीपं गतवान् । परन्तु दुष्टदास्याः मन्थरायाः दुर्बोधनात् सा रुदती स्थिता आसीत् । किमर्थमिति चिन्तापरस्य दशरथस्य प्रश्नस्योत्तरं वदन्ती सा-बहुवर्षेभ्यः पूर्वं दशरथेन दत्तं वरद्वयं स्मारयित्वा यदि वरद्वयमिदानी ददाति तदा एव अहं सन्तुष्टा स्याम् ' इति अवदत्



# लङ्कायां हनूमान्



- सुग्रीवः अङ्गदस्य नेतृत्वे दक्षिणदिशि वानरसैन्यं प्रेषितवान् । हनुमानपि अङ्गदस्य सेनापतिः भूत्वा तेन सह गतवान्। ते बहुदूरमतीत्य दक्षिणभागे महासमुद्रमेकमपश्यन् । सागरस्य पारं गन्तुमसमर्थाः सर्वे चिन्ताक्रान्ताः । परन्तु हनुमान् सैनिकान् तत्रैव स्थातुम् उक्त्वा स्वदेहं विशालं कृत्वा महाररूपं धृत्वा अपारं जलराशिम् उल्लङ्घ्य त्रिकूटपर्वते अवतीर्य लङ्कानगरमपश्यत् । महद्भिः रक्षकैः आवृतम् एतत् नगरं मार्जालवत् प्रविश्य अपश्यत् । परन्तु सीता तत्र नासीत् । तदनन्तरम् अशोकवने वृक्षस्याधः राक्षसीभिः परिवृता दुःखतप्ता सुन्दरी सीता तेन दृष्टा ।

# लङ्कायां युद्धम्

समुद्रे सेतुं विना यः कोऽपि लङ्कां प्राप्तुं न शक्नोति। हनुमानेकः समुद्रमुल्लङ्घयितुं समर्थः अस्ति इति विचिन्त्य रामः समुद्रराजं प्रार्थितवान् । दिनत्रयमपि तत्रैव स्थित्वा प्रार्थितः चेदपि सः प्रसन्नः नाभवत् इतिकारणतः कुपितः रामः समुद्रस्योपरि शरप्रयोगं कतुमुद्युक्तः । तदा वरुणः प्रत्यक्षः भूत्वा तरङ्गान् दृढान् कृत्वा सेतुबन्धनं कर्तुम् आनुकूल्यं कल्पितवान् । सैन्येन सह रामः लङ्कां प्रविशति इति वार्तां श्रुत्वा भयस्य वातावरणं सृष्टम् (उत्पन्नम्) अभवत् । रावणस्यानुजः विभीषणः रामेण सह सन्धिं करोतु इति रावणम् उपदिष्टवान् परन्तु एतेन रावणः क्रुद्धः अभवत् ।



# सारांशः

- रामायणकथानायकः श्रीरामः हिन्दुभिः पूज्यमानेषु देवेषु अन्यतमः । रामः यत्र वसति स्म, यत्र यत्र प्रवासं कृतवान्, तादृशस्थानानि अद्य पवित्रक्षेत्राणि अभवन् । सनातनधर्मानुयायिनां तु रामायणकथायामतीव श्रद्धा वर्तते । पूर्णरामायणम् अथवा रामायणास्य केचन भागाः श्रद्धया पठ्यन्ते अथवा श्रूयन्ते चेत् यः पठति शृणोति वा सः महापापादपि प्रमुच्यते इति अनेके विश्वसन्ति । धार्मिकाणामभिप्राये रामः त्रिमूर्तिषु अन्यतमस्य विष्णोः एव अवतारः । धर्मसंस्थापनार्थाय एव भुवमवतीर्णः श्रीरामः ।

# धन्यवाद